श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीमालोलस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमालोलस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

माया धव ! श्रीनृहरे नमस्ते !
कायाधवार्थं कलितावतार !।
मायापरं मामपि रक्षितुं त्वं
कायान्तराभाहि तमो विभिन्दन्॥ 1 ॥

मालोलमाहुर्भगवन् ! भवन्तं
सन्तो महान्तो निगमान्तनिष्ठाः।
तथैकलं चाहुरहो ! विचित्रं
मिथो विरोधान्मतिरेति मोहम्॥ 2 ॥

त्वां तत्त्वतो वेत्तुमहं न चालं
मामेकलं तेन विभावयामि।
मालोललोलं च विभाव्य नाथ !
दयानिधे ! मोहमहं त्यजामि॥ 3 ॥

हिरण्यवर्णां हरिणीं वहन्तं
गजं भजन्तं परिपालयन्तम्।
मालोलसिंहं परमाद्भुतं त्वां
आगस्विनामग्रगतः प्रपद्ये॥ 4 ॥

हिरण्यमूर्तिं तपनान्तरङ्गे
हिरण्यशृङ्गं वरुणात्मतायाम्।

हिरण्यवर्णां हरिणीं वहन्तं
    हिरण्यदानं भगवन्तमीडे ॥ 5 ॥

प्रह्लादवन्नतजनं परिपालयन्तं
    तत्तातवन्नतजनाघमपोहयन्तम्।
प्रह्लाददं नतजनाय हिरण्यदं च
    मालोलमानवमृगेन्द्रमहं प्रपद्ये ॥ 6 ॥

स्थूणाधिकानामपि मादृशानाम्
    अन्तर्निवासाय स एव योग्याम्।
स्थूणान्तरासाद्य चकार तस्मै
    मालोलसिंहाय नमो नमोऽस्तु ॥ 7 ॥

हिरण्यवक्षो न रुषा व्यदारीत्
    दयानिधिर्वत्सल एष नाथः।
नखैश्चिकित्सां पुनराततान
    दोषान् तदन्तर्वहतो निरस्यन् ॥ 8 ॥

एवं त्रिरेव प्रभुरस्य कृत्वा
    वैद्यश्चिकित्सां शिशुपालतायाम्।
दोषानपोह्य क्षमया ददौ तत्
    स्वानन्दमस्मै तममुं प्रपद्ये ॥ 9 ॥

मालोलसिंहाय नमो नमस्ते
    मालोलमेनं विषयेष्वजस्रम्।
आलोलमाहेति कुटुम्बकार्ये
    मालोलमालोकत आतनुष्व ॥ 10 ॥

मालोलेति त्र्यक्षरी यस्य कण्ठे
    मालोला स्यात् सुस्थिरा तस्य गेहे।

माला लोला सत्कलानां च तस्मिन्
बालालापा लालनीयाः कलाश्च ॥ **11** ॥

श्रीवासराघवकवीन्द्रपयोधिजातं
मालोलविष्णुपददेवनदर्शनीयम्।
एतं निषेव्य समये स्तवराजचन्द्रं
संसारतापमखिलं शमयन्तु सन्तः ॥ **12** ॥

॥ इति श्रीमालोलस्तवः समाप्तः ॥